यतं कालमात्मनोव्रतमादिशेत्” प्रा०त०संव० उक्तेः। “सेकादुल्लेखनाल्लेपात् गृहं मार्ज्जनलेपनात्” “सम्मार्ज्जनोपाञ्जनेन सेकेनोल्लेखनेन च” मनुः। यज्ञे वह्निस्थापनाङ्गस्थण्डिलादिस्थबालुकादौ रेखाभिः ४चिह्नकरणे। “ओल्लेखनात् करोति मेखलादि चेत्”कात्या०७,४,६। तदा भूमौ प्राच्यां रेखया उल्लेखनान्तं कर्म्म कुर्य्यात्” कर्कः। ५घर्षणे च।

**उल्लोच** पु० ऊर्द्ध्वं लोच्यते उद्+लोच–कर्मणि घञ् निष्ठायां सेट्कत्वात् न कुत्वम्। चन्द्रातपे विताने।

**उल्लोप्य** न० उद्+लुप–यत्। लौकिकगीतिभेदे। तच्च मिताक्षरायां दर्शितं यथा।

“यस्य पुनश्चित्तवृत्तिर्निराकारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपासनं कार्य्यमित्याह। “यथाविधानेन पठन् सामगायमविच्युतम्। सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति”या०।“स्वाध्यायावगतमार्गानतिक्रमेण सामगायं साम्नोगानात्मकत्वेऽपि गायमिति विशेषणम् अगीतमन्त्रव्युदासार्थम्। अविच्युतमस्खलितम्। सावधानः समाध्यनुष्यूतात्मैकाग्र्यचित्तवृत्तिः। पठन् तदभ्यासवशात्तत्र निष्णातः। शब्दाकारशून्योपासने परब्रह्माधिगच्छति। तदुक्तम्। “शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति”। यस्य पुनर्वैदिक्याङ्गीतौ चित्तं नाभिरमते तेन लौकिकगीतानुष्यूतात्मोपासनङ्कार्य्यमित्याह। “अपरान्तकमुल्लोप्यं मद्रकम्प्रकरीन्तथा। औवेणकं सरोविन्दुमुत्तरङ्गीतकानि च। ऋग्गाथापाणिकादक्ष विहिता ब्रह्मगीतिका। गेयमेतत्तदभ्यासकरणान्मोक्ष संज्ञितम्”या०। “अपरान्तकोल्लोप्यमद्रकप्रकर्य्यौवेणकानि सरोविन्दुकसहितञ्चोत्तरमित्येतानि प्रकरणाख्यानि सप्त गीतकानि। चशब्दादासारितवर्द्धमानकादि गीतकानि गृह्यन्ते। गाथाद्यास्तत्तोगीतकानि गृह्यन्ते। ऋग्गाथाद्याश्चतस्रोगीतिका इत्येतदपरान्तकादिगीतजातमध्यारोपितात्मभावमोक्षसाधनत्वान्मोक्षसंज्ञितं मन्तव्यम्। तदभ्यासस्यैकाग्रतापादनद्वारेणात्मैकतापत्तिहेतुत्वात्। “चित्तविक्षेपाद्यन्तरायहतस्य गीतज्ञस्य फलान्तरमाह।“गीतज्ञो यदि योगेन नाप्नोति परमम्पदम्। रुद्रस्यानुचरोभूत्वा सह तेना मोदते” या०। “गीतज्ञोयदि कथञ्चिद्योगेन परमम्पदन्न प्राप्नोति। तर्हि रुद्रस्य सचिवोभूत्वा तेनैव सह मोदते”। [२अतिचञ्चले त्रि०।

**उल्लोल** पु० उद्+लोल–घञ्। १महातरङ्गे अमरः।

**उल्व** पु० उच–समवाये आधारे वन् “उल्वादयश्च” उणा०नि०चस्य लः गुणाभावश्च। गर्भवेष्टनचर्म्मणि “उल्वावृतोगर्भोदश वा मासानन्तः शयित्वा यावद्वाऽथ जायते” छा० उ०। “उल्वावृत इत्यादि वैराग्यहेतोरिदमुच्यते। कष्टं हि मातुः कुक्षौ मूत्रपुरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य गर्भस्योल्वाऽशुचिपूयावृतस्य लोहितरेतोऽशुचिवीजस्य मातुरशितपीतरसानुप्रवेशेन विवर्द्धमानस्य निरुद्धशक्तिबलवीर्य्यतेजःप्रज्ञाचेष्टस्य शयनं, ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं ग्राहयति मुहूर्त्तमप्यसह्यं दश वा मासानतिदीर्घकालमन्तःशयित्वेति” इति शा०भा०। कर्त्तरि वन्। २गर्भे

**उल्वण** त्रि०उल्वा दाहेन वलति पचाद्यच् पृषो०। व्यक्ते स्पष्टे उल्बणशब्दे उदा०।[ऋ०२,६,७। “कामयमानदाही”भा०

**उश** त्रि०वश–क। कामयमाने “अपो यदग्न उशधग्वनेषु”

**उशत्** त्रि० वश–शतृ सम्प्र०। कामयमाने। “उशन् ह वै वाजश्रवसः सर्वसदेवसं ददौ” कठ उ० स्त्रियां ङीप्। “उशतीरिव मातरः” अघमर्षणसूक्तम्। सा च अकल्याणायां वाचि” शब्दरत्ना०। तत्र रुशतीत्येव पाठोयुक्तः रुश हिंसायामित्यादिकस्यैव शत्रन्तस्य तद्रूपम्। इति अमरटीकायां भानुजदीक्षितः। उशतीति पाठस्तु लिपिकरप्रमादात्। तन्मूल एव शब्दकल्पद्रुमोऽपि चिन्त्यः वशधातोरिच्छार्थकतया तथार्थत्वासम्भवात्।

**उशनस्** पु० वश–कनसि सम्प्र०। भार्गवे शुक्रे। सौ उशना संबुद्धौ उशनन्-उशन,-उशनः। “अध्यापितस्योशनसापि नीतिम्”कुमा०। उशनसा प्रोक्तम् अण्। औशनस तत्कृते धर्मशास्त्रे “मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः” इत्युपक्रम्य “धर्मशास्त्रप्रयोजकाः या०। तस्येदम् अण्। तदीये त्रि०स्त्रियां ङीप् औशनसी नीतिः। अयञ्चासुराणां पुरोहितः यथोक्तम् “सुराणामसुराणाञ्च समजायत वै मिथः। ऐश्वर्य्यं प्रति संघर्षस्त्रैलोक्ये सचराचरे। जिगीषया ततो देवावव्रिरेऽङ्गिरसं मुनिम्। पौरोहित्येन याज्यार्थे काव्यं तूशनसं परे। ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्द्धिनौ नृप!” भा० आ० ७६ अ०। “असुराणामुपाध्यायः शुक्रस्त्वृषिसुतोऽभवत्। ख्याता उशनसः पुत्राश्चत्वारोऽसुरयाजकाः”भा०आ०६५ अ०। सच भृगुपुत्रः भा० आ०६६अ० उक्तः “भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः। त्रैलोक्य प्राणयात्रार्थं वर्षावर्षे भयाभये। स्वयम्भुवा नियुक्तः